॥ पतञ्जलिध्यानश्लोकाः ॥

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥

आबाहुपुरुषाकारं
शङ्खचक्रासिधारिणम्।
सहस्रशिरसं श्वेतं
प्रणमामि पतञ्जलिम्॥

यस्त्यक्त्वा रूपमाद्यं प्रभवति जगतोऽनेकधानुग्रहाय
प्रक्षीणक्लेशराशिर्विषमविषधरोऽनेकवक्त्रः सुभोगी।
सर्वज्ञानप्रसूतिर्भुजगपरिकरः प्रीतये यस्य नित्यं
देवोऽहीशः स वोऽव्यात्सितविमलतनुर्योगदो योगयुक्तः॥

श्रीमत्पतञ्जलिमहामुनये नमः